International Journal of Sanskrit Research 2017; 3(3): 84-87

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(3): 84-87
© 2017 IJSR
www.anantaajournal.com
Received: 18-03-2017
Accepted: 19-04-2017

**खोकनभट्टाचार्य्यः**
सहायकाध्यापकः संस्कृतविभागे श्रीगोपालव्यानार्जीमहाविद्यालयस्य

# न्यायशास्त्रे वितण्डापद्धतिविमर्शः

**खोकनभट्टाचार्य्यः**

## भूमिका

भारतीयदर्शनसम्प्रदाये विचारपद्धतिः कथाशब्देनोच्यते। सा कथा वादादिभेदेन त्रिविधा। तदुक्तं भाष्ये –"तिस्रः कथा भवन्ति, वादो जल्पो वितण्डा च"इति।१ यत्र वादिप्रतिवादिनौ स्वपक्षमादाय युक्त्या परपक्षदूषणपुरःसरं स्वपक्षं साधयतस्तत्र कथा भवति। तत्त्वनिर्णय-प्रयोजकः साधकदूषकवचनसमूहो वा कथा। तदाह वृत्तिकारः –"तत्र तत्त्वनिर्णयविजयान्यतरस्वरूपयोग्यन्यायानुगतवचनसन्दर्भः कथा" इति।२

**न्यायमते वितण्डालक्षणम्-** कथात्रिकेषु वितण्डा हि अन्तिमा। वितण्डास्वरूपविषये उक्तं तावत् महर्षिणा गौतमेन वितण्डालक्षणम्- "स प्रतिपक्षस्थापनाहीनो वितण्डा" इति।३ (१।२।३)।

अत्र लक्षणसूत्रे 'स प्रतिपक्षस्थापनाहीनः' इति च लक्षणम्। सूत्रस्थेन 'स' इति पदेन जल्पो बोध्यः। अतो वितण्डा नाम जल्पविशेषा। जल्पे यथा स्वपक्षस्थापनं परपक्षखण्डनञ्च भवति, तथैव नात्र वितण्डायाम्। तर्हि किमत्र विशेषः? प्रतिपक्षस्थापनाहीनत्वमेवात्र वितण्डायाः विशेषः। प्रतिपक्षपदेन वैतण्डिकस्य प्रतिवादिनः पक्ष एव बोध्यः। तथाहि कथितं न्यायमञ्जर्य्याम् – "उत्तरपक्षवादी वैतण्डिकः प्रथमवादिप्रसाध्यमान-पक्षापेक्षया 'हस्तिप्रतिहस्ति' न्यायेन प्रतिपक्ष इत्युच्यते।" इति।४

अतो वितण्डायां वैतण्डिकस्य स्वपक्षस्थापना न तिष्ठति। केवलं परपक्षखण्डितार्थकत्वात्। वृत्तिकारमते तु तत्पदेन पूर्वोक्तमुभयपक्षस्थापनारूपं विशेषणं परित्यज्य प्रतिपक्षस्थापनाहीनत्वमेव गृहितम्। भाष्यकारेणापि भाषितम् – "स जल्पो वितण्डा भवति, किं विशेषणः? प्रतिपक्षस्थापनया हीनः। यौ तौ समानाधिकरणौ विरुद्धौ धर्मौ प्रतिपक्षावित्युक्तम्, तयोरेकं वैतण्डिको न स्थापयतीति, परपक्षप्रतिषेधेनैव प्रवर्तते।" इति।५

ननु तर्हि प्रतिपक्षहीनो वितण्डेति युक्तम्, किं तावत् स्थापनाग्रहणेन सूत्रे इति चेन्न, तस्य पक्षसत्त्वात्। औपचारिको परमतपरकरणरूप एवास्य पक्षः। तस्मिन् हि सति वैतण्डिकस्य

Correspondence
**खोकनभट्टाचार्य्यः**
सहायकाध्यापकः संस्कृतविभागे श्रीगोपालव्यानार्जीमहाविद्यालयस्य

स्वपक्षः सिध्यत्येवेति ज्ञेयम्। वैतण्डिकस्य प्रतिवादिनः स्वसिद्धान्त एव पक्षः, स हि वादिनः प्रतिपक्षः। तस्य स्थापनाभावादपि स्थापनायोग्यता वर्तत एवेति स पक्ष एव। तदुक्तं वाचस्पतिमिश्रेण तात्पर्यटीकायाम् – "पक्षत्वन्तु तद्योग्यतामात्रेण, न तु स्थाप्यमानतयेति। अतो वितण्डा न तु प्रतिपक्षहीना, अपितु प्रतिस्थापनाहीना।" इति।६

अत्र वार्तिककार उद्योतकरः पूर्वपक्षमेकम् उल्लिख्य कथयति – "अपरे तु ब्रुवते दूषणमात्रं वितण्डेति। दूषणमात्रमिति मात्रशब्दप्रयोगाद् वैतण्डिकस्य पक्षोऽपि नास्ती" -ति।७ एतन्मतमप्ययुक्तम्, पूर्वोक्तयुक्तिप्रदर्शनात्। वस्तुतो पूर्वोक्तं मतमिदं शून्यवादिन एव। तन्नये स्वपक्षसिद्धिरेव नास्ति वितण्डायाम्। स्थापनापदं वितण्डालक्षणे व्यर्थमेवेति प्रतिपादितम्।

**वितण्डा सप्रयोजना न वेति विचारः–** वादजल्पयोः स्वपक्षसाधनरूपं प्रयोजनमस्तीति प्रसिद्धमेव। किन्तु वितण्डायाः प्रयोजनं तावत् किमिति विषये भाष्ये किञ्चिदालोचितम्। तत्रादौ कथितं वितण्डा सप्रयोजना निष्प्रयोजना वेति आक्षेपे वैतण्डिको यदि स्वीकरोति तस्य पक्षोऽस्त्येव, स्वपक्षसिद्धिरेव तस्य पक्ष इति। तथात्वे निष्प्रयोजनवितण्डावादिमते वैतण्डकत्वं न तिष्ठति। अपरतश्च स्वपक्षस्यास्वीकारे तस्य लौकिकत्वापगमे निर्बुद्धिता भवति स्थापिता। यतो हि उच्यते – " प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते" इति।८ तथा च भाष्यम् – "तत्र वादजल्पौ सप्रयोजनौ, वितण्डा तु परीक्ष्यते। वितण्डया प्रवर्त्तमानो वैतण्डिकः। स प्रयोजनमनुयुक्तो यदि प्रतिपद्यते, सोऽस्य पक्षः सोऽस्य सिद्धान्त इति, वैतण्डिकत्वं जहाति। अथ न प्रतिपद्यते, नायं लौकिको न परीक्षक इत्पापद्यते।" इति।९

किञ्च परपक्षप्रतिषेधज्ञापनं प्रयोजनमित्युक्तेऽपि पूर्वोक्तो दोषो भवति। तथात्वे तु ज्ञापकः, ज्ञाता, ज्ञापनसाधनानि प्रमाणानि, ज्ञापनीयो विषयश्च एतेषां स्वीकारे स्वपक्षस्वीकारात् वैतण्डिकत्वं न तिष्ठति। अपि च ज्ञापकाद्यस्वीकारे च परपक्षप्रतिषेधज्ञापनं प्रयोजनमिति वाक्यमपि भवति अनर्थकम्।

वस्तुतः स्वपक्षस्य स्थापनाहीनो वाक्यसमुहो वितण्डेति। शून्यवादिनस्तस्य वाक्यसमुहस्य प्रतिपाद्यत्वं स्वीकुर्वन्ति चेत् स एव पक्षः प्रमाणादिभिर्भवति स्थापनीयः। अस्वीकारे च प्रलापमात्रत्वात् अनर्थकत्वाच्च तस्य वितण्डात्वमेव स्वयमेव घ्नन्ति। तथा च भाष्यम् –"वाक्यसमूहश्च स्थापनाहीनो वितण्डा, तस्य यद्यभिधेयं प्रतिपद्यते, सोऽस्य पक्षः स्थापनीयो भवति, अथ न प्रतिपद्यते , प्रलापमात्रमनर्थकं भवति, वितण्डात्वं निवर्त्तत इति"।१० अतो वितण्डापि सप्रयोजना, अपि च तस्याः परपक्षखण्डनमात्रं प्रयोजनमित्यपि न युक्तम्, स्वपक्षसिद्धिरेव वितण्डायाः मुख्यं प्रयोजनमिति वक्तव्यम्। वैतण्डिकेन कोऽपि स्वपक्षः स्वीकर्तव्य एव। यद्यपि तं पक्षं प्रमाणादिभिः स नोपस्थापयति, तथापि स्वपक्षसिद्धिस्तस्य वितण्डाया उद्देश्यमिति स्वीकार्यमेव। प्रसङ्गेऽस्मिन् वार्तिककारोऽपि आह – " न दूषणमात्रं वितण्डा, किन्तु अभ्युपेत्य पक्षं यो न स्थापयति, स वैतण्डिक उच्यते।" इति।११

**आयुर्वेदशास्त्रे वितण्डास्वरूपम्–** आयुर्वेदशास्त्रे विगृह्यसंभाषान्तर्गता हि वितण्डा। तस्या आलोचनं तु न वैशद्येन विहितम् केवलमुक्तम् – "जल्पविपर्ययो वितण्डा। वितण्डा नाम परपक्षे दोषवचनमात्रमेव।" (विमानस्थान ८।२८)इति।१२ कस्तावत् जल्प इति तु पूर्वमुक्तमेव, तत्र वादिप्रतिवादिनौ स्वस्वपक्षं स्वस्वहेतुभिरुपस्थापयतः। जल्पे प्रत्येकयोः पृथक् पृथक् पक्षो वर्तते एव। किन्तु वितण्डायाम् उत्तरवादिनः परपक्षदूषणलक्षणः पक्षोऽस्तीति भेदः। स्वमतं वैतण्डिको न साधयतीति। वस्तुतस्तु यो नाम वैतण्डिकः स पूर्वपक्षिणा यदुक्तम्, तद्वचनदोषमेव दर्शयति। न तु स्वस्य किमपि मतमुपस्थापयति। अतोऽत्र शास्त्रे कथितं जल्पविपर्ययो वितण्डेति।

अत्र वितण्डाविषये केचन विषया अवगन्तव्या। प्रथमतः– वैतण्डिकस्य पक्षो नास्तीति केषाञ्चिन्मतम्। यतो हि न किमपि वैतण्डिकः वैतण्डिकस्य पक्षत्वेन स्थापयति। किन्तु परपक्षे दोषोद्भावनात् परपक्षदूषणलक्षणः पक्षोऽस्तीति वैतण्डिकस्य पक्षो नास्तीति न युक्तम्।

द्वितीयतः– कदाचिद् वितण्डायां केवलं दोषदर्शनेन भवति वैतण्डिकस्य विजयः। तत्र परमतःखण्डनात् परं स्वमतं स्वयमेवोपस्थापितं भवति। तत्र युक्तया स्वमतोपस्थापनां नापेक्षते। किन्तु सामान्यतः परमतखण्डनात् परं स्वमतोपस्थापनद्वारा भवति कस्यापि विजयः इति बोध्यम्।
तृतीयतः- वितण्डायां वादिप्रतिवादिनौ उभयौ यदि वैतण्डिकौ स्यात् तर्हि उभययोः कार्यं तावत् परपक्षे दोषोद्भावनं भवति। तथात्वे तु वितण्डा नारभेत। यत्र वादे कोऽपि पक्षो न तिष्ठति चेत् कथं तत्र अपरपक्षे दोषः स्यात् ? अतः वितण्डायमुभयौ वैतण्डिकौ न स्याताम्। तत्र पूर्वम् एकः कमपि पक्षमुपस्थापयति चेत् तदैव वैतण्डिकः तस्मिन् पक्षे दोषं दर्शयति। अतः वितण्डायामेक एव वैतण्डिकः तिष्ठति। न तु वितण्डाख्यायां संभाषायां यः भागग्रहणं करोति स एव वैतण्डिको भवतीति ज्ञेयम्। जल्पे तु न तादृशम् असौविध्यं, तत्र उभययोरेव जाल्पिकयोः स्वस्वपक्षोपस्थापनसम्भवात्।

**वितण्डोपसंहारः** न्यायशास्त्रे तृतीयकथा हि वितण्डा। आयुर्वेदशास्त्रेऽपि वितण्डां स्वीकृत्य तस्याः आलोचनं विहितम्। जैनशास्त्रे तथा बौद्धशास्त्रे वितण्डा नाङ्गकृता, तस्याः प्रात्यक्ष्येण विवादकारणात्। जैनाचार्या हि वितण्डायाः खण्डनमपि विहितम्। तथा हि कथितं प्रमाणमीमांसायाम्- "ननु यथोक्तोपपन्नच्छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः' इति, 'स प्रतिपक्षस्थापनाहीनो वितण्डा' इति लक्षणे भेदाज्जल्पवितण्डे अपि कथं विद्यते एव, न, प्रतिपक्षस्थापनाहीनायाः वितण्डायाः कथात्वायोगात्, वैतण्डिको हि स्वपक्षमभ्युपगम्यास्थापयन् यत्किञ्चिद्वादेन परपक्षमेव दूषयन् कथमवधेयवचनः?' इति।"
यत्र वितण्डायां स्वपक्षमस्थापयन् केवलं वैतण्डिकः परपक्षं दूषयति तत्र तस्य स्वपक्षो नावबुध्यते। द्वयोरधिके पक्षास्तिष्ठन्ति चेत् वितण्डायां वैतण्डिकः सर्वाणि मतानि खण्डयति। तथात्वेऽपि वैतण्डिकस्य पक्षः निश्चिततया न ज्ञायते। अतो जैनमते वितण्डा न ग्राह्या।
वस्तुतः एतन्मतमयुक्तम्, अन्यत्र द्वयोः पक्षयोः विद्यमानत्वे केवलं खण्डनेनैव स्वपक्षो भवति सुज्ञातः। तत्र स्वपक्षोपस्थापनापेक्षा न तिष्ठति। यथा – आत्मा अनित्यो नित्यो वेति पक्षयोर्मध्ये वैतण्डिकः 'आत्मा अनित्यः' इति पक्षं खण्डयति चेत् स्वपक्षानुपस्थापनादपि 'आत्मा नित्यः' इति वैतण्डिकस्य पक्षः सुखेनावगम्यते। अतः वितण्डाविषये जैनमतं नोपादेयम्।
बौद्धाः यद्यपि वितण्डां कथात्वेन न गृह्णन्ति, तथापि नागार्जुनस्य प्रसङ्गपद्धतिं दृष्ट्वा एतदनुमीयते यत् – सा प्रसङ्गपद्धतिः वितण्डासायुज्यं भजते। तथाहि मध्यमकशास्त्रे निर्वाणपरीक्षायामुक्तं निर्वाणं भावरूपम्, अभावरूपम्, भावरूपमभावरूपञ्च, न भावरूपं नाभावरूपं वेति ? न भावरूपं जरामरणहीनं निर्वाणम्, जरामरणं विना भावस्याविद्यमानत्वात्। तदुक्तम् –

"भावस्तावन्न निर्वाणं जरामरणलक्षणम्।
प्रसज्येतास्ति भावो हि न जरामरणं विना।।" इति (२५।४)।१३

एवञ्च नाभावरूपं क्लेशजन्मनोरभावरूपत्वे निर्वाणस्यानित्यताप्रसङ्गात्, नापि भावरूपमभावरूपञ्च, तत् यथा व्यवहाराभावात्। अपि च न भावरूपं नाभावरूपमित्यपि न युज्यते, भावाभावयोरसत्त्वेन तत्प्रतिषेधव्याघातापत्तेः। एवंप्रकारेण स कथयति निर्वाणं चतुष्कोटिविनिर्मुक्तमेव। तन्निगदितं नागार्जुनेन –

"न संसारस्य निर्वाणात् किञ्चिदस्ति विशेषणम्।
न निर्वाणस्य संसारात् किञ्चिदस्ति विशेषणम्।।" इति (२५।१९)।१४

अत्र दृश्यते चतुर्णां पक्षाणां खण्डनमेव कृतं तत्र भवता नागार्जुनेन। किन्तु स्वमतं किमपि नोपन्यस्तम्।एवञ्चान्यत्रापि प्रसंङ्गपद्धतिरेषा न्यायसम्मतवितण्डारूपेति वक्तुं शक्यते।
अत्रेदमुल्लेख्यं यत् वेदान्तशास्त्रे यद्यपि वादादिकथाया आलोचनं न सुप्रापम्, तथापि ते वैदान्तिकाः वादजल्पवितण्डापद्धतिम् अनुसरन्त्येव। वेदान्तशास्त्रस्य खण्डनखण्डखाद्यग्रन्थो हि वितण्डाग्रन्थत्वेनोच्यते। तत्र हि

न्यायशास्त्रीयवितण्डापद्धतिरेवानुसृता। यदि वैदान्तिकैः वितण्डा न स्वीक्रियते, तर्हि कथं तथाविधपद्धतिस्तैः अनुसृता भवेत्। अतः वैदान्तिकैकदेशिनः समीपे वितण्डा उपादेया आसीदिति वक्तुं युज्यते।

पाश्चात्ये "आम्स्टारडाम् स्कुल् अफ् प्रागमा डायालेक्टिक्स्" इत्यस्य चिन्ताविदः वक्तव्येऽपि वितण्डास्पर्शो विद्यते। तन्नये विचारो द्विविधः साधारणः मिश्रश्चेति (Simple and mixed)। साधारणविचारे एकः पक्षः स्वमतमुपस्थापयति, प्रतिपक्षः तन्मतं खण्डयति, न तु स्वमतमुपस्थापयति। द्वितीये विचारे तु उभयौ स्वस्वपक्षमुपस्थापयतः। अत्र आद्यो विचारो हि न्यायानुगतवितण्डासायुज्यं गच्छति।१५

## सहायकग्रन्थपञ्जी


1. गौतमः, न्यायदर्शनम् वृत्तिभाष्यवार्तिकतात्पर्ययुतम्, एम्. मनहरलाल पावलिशरस्, न्यु दिल्ली, २००३, पृष्ठाङ्कः- ३३५।
2. तत्रैव, पृष्ठाङ्कः- ३४३।
3. तत्रैव, पृष्ठाङ्कः- ३६१।
4. जयन्तभट्टः, न्यायमन्जरी(गौरीनाथशास्त्रीसम्पादिता), तृतीयखण्डः, सम्पुर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, १९८४, पृष्ठाङ्कः- १२२।
5. गौतमः, न्यायदर्शनम् वृत्तिभाष्यवार्तिकतात्पर्ययुतम्, एम्. मनहरलाल पावलिशरस्, न्यु दिल्ली, २००३, पृष्ठाङ्कः-३६१।
6. तत्रैव, पृष्ठाङ्कः- ३६२।
7. तत्रैव, पृष्ठाङ्कः- ३६२।
8. प्रचलितोक्तिः।
9. गौतमः, न्यायदर्शनम् वृत्तिभाष्यवार्तिकतात्पर्ययुतम्, एम्. मनहरलाल पावलिशरस्, न्यु दिल्ली, २००३, पृष्ठाङ्कः-४४।
10. तत्रैव, पृष्ठाङ्कः- ४४।
11. तत्रैव, पृष्ठाङ्कः- ४५।
12. अग्निवेशः, चरकसंहिता आयुर्वेददीपिकासमेता, कृष्णदास अकादेमी, वाराणसी,२००६, पृष्ठाङ्कः- २६६।
13. नागार्जुनः, मध्यमकशास्त्रम्, मिथिलाविद्यापीठम्, दारभाङ्गा, १९६०, पृष्ठाङ्कः– २२९।
14. तत्रैव, पृष्ठाङ्कः– २३४।
15. दत्तशर्मा रत्ना, न्यायदर्शने निग्रहस्थान, यादवपुर विश्वविद्यालय, कलिकाता, २०११, पृष्ठाङ्कः- १८।